नामांकाः Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 22

# S—71—Sanskrit (T.L.) (Supp.)

No. of Printed Pages — 11

# माध्यमिक पूरक परीक्षा, 2013

## SECONDARY SUPPLEMENTARY EXAMINATION, 2013

# तृतीय भाषा — संस्कृतम्

समय : $3\frac{1}{4}$ ( सपाद होरात्रयम् )

अधिकतमांकाः 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

1. अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत —

दीपावली अस्माकं राष्ट्रियोत्सवः वर्तते । अस्मिन् उत्सवे सर्वे जनाः परस्परं भेदभावं विस्मृत्य आनन्दमग्नाः भवन्ति । त्रेतायुगे कैकेय्याः वरयाचनात् अयोध्यायाः राज्ञा दशरथेन रामाय चतुर्दशानां वर्षाणां वनवासः प्रदत्तः । श्रीरामः अस्मिन् एव दिने सीतालक्ष्मणाभ्यां सह अयोध्यां प्रत्यावर्तितवान् ।

(क) एकपदेन उत्तरत —

(i) दीपावली अस्माकं कीदृशः उत्सवः वर्तते ? $\frac{1}{2}$

(ii) केन रामाय चतुर्दशानां वर्षाणां वनवासः प्रदत्तः ? $\frac{1}{2}$

(ख) श्रीरामः अस्मिन् एव दिने काभ्यां सह अयोध्यां प्रत्यावर्तितवान् ? ( पूर्णवाक्येन उत्तरत ) 1

(ग) निर्देशानुसारम् उत्तरत —

(i) ''भवन्ति'' क्रियापदस्य कर्त्ता लेखनीयः । $\frac{1}{2}$

(ii) ''वर्तते'' इति पदं मध्यमपुरुषेकवचने परिवर्त्य लिखत । $\frac{1}{2}$

(iii) 'राष्ट्रियोत्सवः' पदस्य सन्धिविच्छेदं कृत्वा लिखत । $\frac{1}{2}$

(iv) 'समभावं' इत्यस्य विलोमपदं अनुच्छेदात् चित्वा लिखत । $\frac{1}{2}$

2. अधोलिखितं गद्यांशं प्रपठ्य एतदाधारित प्रश्नानामुत्तराणि यथानिर्देशं लिख्यन्ताम् —

सतां जनानां संगतिः सत्संगतिः कथ्यते । मानवः यादृशैः सह वसति तादृशः एव भवति । सज्जनानां सम्पर्केण मनुष्यः सज्जनः भवति उन्नतिं महत् पदं च अलंकरोति । दुर्जनानां संगत्या मनुष्यो दुर्जनो भवति, पतनं विनाशं च प्राप्नोति । अतः मनुष्योपरि संगतेः महान् प्रभावो भवति ।

बाल्यकाले विशेषतो बालकस्योपरि संसर्गस्य प्रभावो भवति । ये यादृशैः बालकैः सह उपविशन्ति, उत्तिष्ठन्ति, खादन्ति, पिबन्ति च ते तथैव स्वभावं धारयन्ति । अतः बाल्यकाले दुर्जनैः सह संगतिः कदापि न करणीया ।

(क) एकपदेन उत्तरत —

(i) सतां जनानां संगतिः किं कथ्यते ? $\frac{1}{2}$

(ii) सज्जनानां सम्पर्केण मानवाः कीदृशाः भवन्ति ? $\frac{1}{2}$

(iii) दुर्जनानां संगत्या मनुष्यः कीदृशः भवति ? $\frac{1}{2}$

(iv) कैः सह संगतिः कदापि न करणीया ? $\frac{1}{2}$

(ख) पूर्णवाक्येन उत्तरत —

(i) मानवः कीदृशैः सह वसति ? कीदृशः एव भवति ? 1

(ii) दुर्जनानां संगत्या मनुष्यः कां गतिं प्राप्नोति ? 1

(iii) बाल्यकाले विशषतो कस्योपरि संसर्गस्य प्रभावो भवति । 1

(ग) अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं लिखत । 1

(घ) यथानिर्देशं प्रश्नान् उत्तरत —

(i) 'प्रगतिम्' इत्यस्य पर्यायवाचिशब्दं अनुच्छेदात् चित्वा लिखत । $\frac{1}{2}$

(ii) मनुष्यः सज्जनैः सह महत् पदं अलंकरोति । अस्मिन् वाक्ये विशेषणपदं किम् अस्ति ? $\frac{1}{2}$

(iii) एतेषां संगत्या मनुष्यो दुर्जनो भवति । ''एतेषां'' इत्यस्य सर्वनामपदस्य स्थाने संज्ञापदं लिखत । $\frac{1}{2}$

(iv) ये यादृशैः बालकैः सह उपविशन्ति । वाक्येऽस्मिन् कर्ता कः अस्ति ? $\frac{1}{2}$

3. भवान् दिलावरः । भवान् दशमकक्षायाः छात्रः अस्ति । भवान् मित्रं एकं पत्रं लिखतु यस्मिन् ''बोर्ड परीक्षायां सफलतां प्राप्तुं शुभकामना'' इति वर्णनं स्यात् । 4

**अथवा**

भवान् कुलदीपः अस्ति । भवतः मित्रं ''पादकन्दुकस्य स्पर्धायां विजयः प्राप्तवान् । अवसरेऽस्मिन् एकम् अभिनन्दनपत्रं मञ्जूषा पद सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखतु ।

$8 \times \frac{1}{2} = 4$

| |
|---|
| परिश्रमं, विजयं, सफलतायै, हर्षम् , परीक्षाकक्षतः, मम, चिरात् , महती । |

(i) ..................

दिनाङ्कः 18. 11. 2012

प्रियवर्य गौरव !

नमोनमः ।

अत्र कुशलं तत्रास्तु ।

अद्य (ii) .................. तव पत्रं प्राप्य अहमतीव (iii) .................. अनुभवामि । भवान् पादकन्दुक स्पर्धायां (iv) .................................... प्राप्तवान् इति ज्ञात्वा (v) .................. प्रसन्नता जाता (vi) .................. अभिनन्दनम् । भवान् सम्यक् (vii) .................. करोति फलमपि प्राप्नोति अतः (viii) ................ बहु आनन्दः अभवत् । सर्वेभ्यो ज्येष्ठेभ्यो प्रणामाः निवेदनीयाः ।

भवदभिन्नं मित्रम्

कुलदीपः

4. मञ्जूषातः उचितानि पदानि चित्वा अधोलिखितं जयपुर-प्रवासाय अनुमतिं प्राप्त्यर्थं माता-पुत्रयोः मध्ये संवादं पूरयत — $8 \times \frac{1}{2} = 4$

| धनं, पितुः, आवश्यकी, प्रवासः, वदतु, अनुमतिं, कक्षायाः, गच्छन्ति । |
|---|

अभिषेकः — अद्य मम कक्षायाः (i) ................ अस्ति ।
अहम् अपि गच्छामि वा ?

माता — अहं कथं वदानि ? पितेव (ii) ................. दास्यति ।

अभिषेकः — भवती एव (iii) ................ तातम् ।

माता — कति छात्राः (iv) ................. भो ?

अभिषेकः — मम (v) ................. सर्वेऽपि गच्छन्ति ।

माता — श्वः एव तातं पृष्ट्वा (vi) ................. नयतु ।

अभिषेकः — (vii) ................. अनुमतिं प्राप्य एव गमिष्यामि ।

माता — आम् ! पितुः अनुमतिः (viii) ................ अस्ति।

अभिषेकः — धन्यवादः मातः । श्वः धनं नेष्यामि ।

5. अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया "भूकम्पस्य विभीषिका" इत्यस्मिन् विषये अष्टवाक्यानि संस्कृतभाषायां लिखत — $8 \times \frac{1}{2} = 4$

| उल्लासे, दारुणं, कच्छजनपदं, विशीर्णा, निहन्यते, ज्वालां, धराशायीनि, योगक्षेमाभ्यां । |
|---|



**अथवा**

अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत — $8 \times \frac{1}{2} = 4$

| |
|---|
| भारतानां, चक्रवर्ती, भरतः, प्रसिद्धः, भरतानां, कुले, भारतवर्षम् , ऋषभस्य । |

अस्माकं देशस्य नाम (i) .................. अस्ति । अयं भरतस्य देशः अस्ति अतः भारतनाम्ना (ii) .................... अस्ति । (iii) .................. पुत्रः भरतः वीरः आसीत् । तस्य नाम्ना अयं देशः "भारतम्" इति अस्ति । भरतस्य (iv) ......................... जाताः अपि भारताः । (v) ....................................... देशः भारतः । शकुन्तला-दुष्यन्तयोः पुत्रस्य नाम अपि (vi) ............................. आसीत् । सः अपि (vii) ................... सम्राट् आसीत् । (viii) ................. भारतानां वा देशः भारतः ।

6. पाठ्यपुस्तकात् **द्वौ** श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे न स्याताम् । 4

7. अधोलिखित पदेषु सन्धिविच्छेदं वा सन्धिं कृत्वा सन्धिनामापि उत्तरपुस्तिकायां लिखत —

(i) दिगम्बरः 1

(ii) पितुर्गृहम् 1

(iii) इति + आत्मनम् । 1

8. अधोलिखित समस्त पदानां विग्रहं **अथवा** विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत —

(i) उपकृष्णम् । 1

(ii) चन्द्र इव मुखम् । 1

(iii) मातापितरौ । 1

9. कोष्ठकेषु प्रदत्तैः शब्दैः प्रकृति प्रत्ययानुसारं रिक्तस्थानपूर्तिः करणीया —

(i) बुद्धिः ................... तन्वि सर्वकार्येषु सर्वदा । ( बल + मतुप् ) 1

(ii) अहं पुस्तकं .............. अस्मि । ( पठ् + शतृ ) 1

(iii) ................ स्वशावकं राज्ञे अदर्शयत् । ( चटक + टाप् ) 1

(iv) विद्यार्थीजीवने छात्रैः स्व .............. पालनीयः । ( कृ + तव्यत् ) 1

10. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत —

( एव, कदा, अधुना, तत्र )

(i) ..................... भवतो व्यवहारेण कोपो मे गलितः । 1

(ii) यत्रास्ते सा धूर्ता ..................... गम्यताम् । 1

(iii) बाढम्, एष ...................... मे निश्चयः । 1

(iv) त्वं भ्रमणार्थं ...................... उदयपुरं गमिष्यसि ? 1

11. अधोलिखित वाक्यानां वाच्यपरिवर्तनं उत्तरपुस्तिकायां लिखत —

(i) वयं पुस्तकं पठामः । 1

(ii) भक्तेन भजनं गीयते । 1

(iii) सीता फलं खादति । 1

(iv) बालकाः कोलाहलं कुर्वन्ति । 1

12. घटिकाचित्रं सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम् —




(क)




(ख)




(ग)

(i) वयं ................ विद्यालयं गच्छामः । 1

(ii) पिता ................. आपणं गच्छति । 1

(iii) .................... विवेकानन्दोत्सवः आरभ्यते । 1

13. (i) 'त्रीणि' इति संख्या पदस्य स्वरचितवाक्ये प्रयोगः करणीयः । 1

(ii) '38' इति संख्यां संस्कृतभाषया शब्देषु लिखत । 1

14. अधोलिखित रेखांकित पद **द्वयं** शुद्धं कृत्वा लेखनीयम् —

(i) इयम् उद्यानं रम्यमस्ति । $\frac{1}{2}$

(ii) वयं सर्वाणि कार्याणि संगणकयन्त्रेण क्रियन्ते । $\frac{1}{2}$

15. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत —

अथ राजानं मुनिरुवाच — ''मन्येभवदीयस्य प्रश्नत्रयस्य समाधानमस्य जनस्य परिवर्तितमानसस्य सेवयैव जातम् । मुनिः पुनरपि विशदीकुर्वन्नकथयत् — अयमेव श्रेष्ठः समयः यत्र मानव परोपकारे कस्मिन्नपि कर्मणि वा व्यापृतः । समक्षं वर्तमानः पुरुष एव श्रेष्ठः कस्यापि सहायतां कामयमानः । सेवैव श्रेष्ठं कर्म येन हृदयपरिवर्तनमपि जायते ।'' राजा मुनेरुत्तरप्रदानपद्धत्या प्रमुदितः भूत्वा स्वनगरं गतः ।

(क) एकपदेन उत्तरत —

(i) कति प्रश्नस्य समाधानं जनस्य सेवयैव जातम् ? $\frac{1}{2}$

(ii) कः विशदी कुर्वन् अकथयत् ? $\frac{1}{2}$

(ख) पूर्णवाक्येन उत्तरत —

(i) श्रेष्ठं कर्म किम् ? 1

(ii) 'गतः' पद स्थाने मूल धातुं लिखत । 1

(iii) ''श्रेष्ठः समयः'' अत्र विशेषणं पदं चित्वा लिखत । 1

(iv) ''संलग्नः'' इत्यस्य पर्यायवाचिपदं गद्यांशात् चित्वा लिखत । 1

16. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत —

मृगा मृगैः सङ्गमनुव्रजन्ति

गावश्च गोभिः तुरगास्तुरङ्गैः ।

मूर्खाश्च मूर्खैः सुधियः सुधीभिः

समान-शीला-व्यसनेषु सख्यम् ॥

(क) समान-शीला-व्यसनेषु कीदृशं भवति ? ( एकपदेन उत्तरत ) 1

(ख) मृगाः कैः सङ्गम् अनुव्रजन्ति ? ( पूर्णवाक्येन उत्तरत ) 1

(ग) सुधियः सुधीभिः सङ्गम् अनुव्रजन्ति ।
वाक्येऽस्मिन् कर्तृपदं किम् ? 1

(घ) "अश्वाः" इत्यस्य पर्यायवाचिपदं श्लोकात् चित्वा लिखत । 1

(ङ) "मूर्खाः" इत्यस्य विलोमपदं श्लोकात् चित्वा लिखत । 1

17. अधोलिखितं नाट्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत —

चन्दनदासः — ( सहर्षम् ) आर्य ! अनुगृहीतोऽस्मि ।

चाणक्यः — भो श्रेष्ठिन् ! स चापरिक्लेशः कथमाविर्भवति इति ननु भवता प्रष्टव्याः स्मः ।

चन्दनदासः — आज्ञापयतु आर्यः ।

चाणक्यः — राजनि अविरुद्ध वृत्तिर्भव ।

चन्दनदासः — आर्य ! कः पुनरधन्यो राज्ञो विरुद्ध इति आर्येणावगम्यते ?

चाणक्यः — भवानेव तावत् प्रथमम् ।

चन्दनदासः — ( कर्णौ पिधाय ) शान्तं पापम् । कीदृशस्तृणानामग्निना सह विरोधः ?

(क) एकपदेन उत्तरत —

(i) "आज्ञापयतु आर्य" । केन कथितम् ? $\frac{1}{2}$

(ii) केषामग्निना सह विरोधः ? $\frac{1}{2}$

(ख) कुत्र अविरुद्धवृत्तिर्भव ? ( पूर्णवाक्येन उत्तरत ) 1

(ग) "भव" अति क्रियापदस्य मूलधातुं लिखत । 1

(घ) आर्य ! अनुगृहीतोऽस्मि । अत्र "अस्मि" क्रियापदस्य कर्तृपदं किम् ? 1

(ङ) कः एव तावत् प्रथमम् ? 1

18. "सेवितव्यो महावृक्षः फलच्छाया समन्वितः"

इत्यस्य भावबोधनं सरल-संस्कृतभाषया लिखत । 2

19. अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम् ।

अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः ॥

उपर्युक्त श्लोकस्यान्वयमाश्रित्य रिक्तस्थानानि पूरयत — $4 \times \frac{1}{2} = 2$

अमन्त्रम् (i) .......................... नास्ति, (ii)........................ मूलं नास्ति, अयोग्य (iii) ...................... नास्ति, तत्र (iv)........................ दुर्लभः ।

20. अधोलिखित वाक्यानां रेखांकित पदेषु प्रश्ननिर्माणं कुरुत —

(i) <u>उद्याने</u> पक्षिणां कलरवं चेतः प्रसादयति । 1

(ii) सा कन्या अतिथिं <u>स्नानाय</u> प्रेरितवती । 1

(iii) व्यायामं कुर्वतः <u>विरुद्धं</u> भोजनमपि परिपच्यते । 1

21. अधोलिखितानि वाक्यानि क्रमरहितानि । यथाक्रमं संयोजनं कृत्वा लिखत — $6 \times \frac{1}{2} = 3$

(i) लोमेशा तं दृष्ट्वा केनापि उपायेन रोटिकां गृहीतुम् ऐच्छत् ।

(ii) काकः आत्मनः प्रशंसां श्रुत्वा प्रसन्नः अभवत् ।

(iii) एकस्मिन् वृक्षे एकः काकः निवसति स्म ।

(iv) सा वृक्षस्य अधः अतिष्ठत् काकं च अवदत् —

'तात मया श्रुतं त्वम् अतिमधुरं गायसि ।'

(v) तस्य वृक्षस्य समीपे एक लोमशा अपि निवसति स्म ।

(vi) एकदा सः काकः एकां रोटिकाम् आनयत् ।

22. **'क' स्तम्भे** पदानि दत्तानि । **'ख' स्तम्भे** क्रमरहिताः तेषां व्याख्या समानार्थक शब्दाः वा दत्ताः । उचितमेलनं कृत्वा लिखत — $6 \times \frac{1}{2} = 3$

| | **'क'** | **'ख'** |
|---|---|---|
| (i) | धूमः | शरीरम् |
| (ii) | संसरणम् | नगरम् |
| (iii) | पत्तनम् | वाष्पः |
| (iv) | अङ्कम् | समयः |
| (v) | गात्रम् | क्रोडम् |
| (vi) | बेला | सञ्चलनम् |